International Journal of Sanskrit Research 2021; 7(5): 184-192

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(5): 184-192
© 2021 IJSR
www.anantaajournal.com
Received: 19-06-2021
Accepted: 05-08-2021

**दुर्गाशरणरथः**

राष्ट्रियसंस्कृतविश्वविद्यालयः,

तिरुपतिः, आंध्र प्रदेश, भारत

**Corresponding Author:**

**दुर्गाशरणरथः**

राष्ट्रियसंस्कृतविश्वविद्यालयः,

तिरुपतिः, आंध्र प्रदेश, भारत

# चतुर्वेदभाष्यकारः श्रीमद्विद्यारण्यस्वामी

## दुर्गाशरणरथः

**शोधसारांशः –**

मान्याः चतुर्वेदभाष्यकारः आचार्यसायणः इति प्रथते हि लोके। नैकेषु अर्वाचीनग्रन्थेषु तथा कतिपयप्राचीनग्रन्थेषु इतिहासादिषु च तत्तद्विद्वद्भिर्प्रतिपादितम् । परन्तु ऐतिहासात्मिकदृष्ट्या यदि वयं परिशीलयामः तर्हि ज्ञायते यत् माधवाचार्यः एव चतुर्वेदभाष्यकर्ता वर्तते ।यस्तु कालान्तरे चतुर्थाश्रमे प्रविश्य श्रृङ्गगिरौ विद्यारण्यस्वामि नाम्ना विभूषितः ।

प्रसङ्गेऽस्मिन् अहोबलपण्डितेन तेलुगुव्याकरणे इत्थं प्रतिपादितम् -

वेदानां भाष्यकर्ता विवृतमुनिवचा धातुवृत्तेर्विधाता,
प्रोद्यद्विद्यानगर्यो हरिहरनृपतेः सार्वभौमत्वदायी।
वाणी नीलाहिवेणी सरसिजनिलया किंकरीति प्रसिद्धा
विद्यारण्योऽग्रगण्योऽभवदखिलगुरुः शंकरो वीतशंकः।।

किञ्च ऋग्भाष्योपक्रमे पूर्वोत्तरमीमांसाकारः माधवाचार्य एव वेदभाष्य कर्ता इति श्रूयते -

ये पूर्वोत्तरमीमांसे ते व्याख्यायाति संग्रहात्।
कृपालुर्माधवाचार्यो वेदार्थं व्याकरोत्खलु।। (ऋग्भाष्योपक्रमे)

वस्तुतः श्लोकेऽस्मिन् उच्चारितपूर्वोत्तरमीमांसाशब्दात् ज्ञातुं शक्यते यत् माधवाचार्य एव चतुर्वेदभाष्यकारः। यैः बुक्कमहीपतेरादेशात् भाष्यं निरमायि, नास्ति चेत् पूर्वोत्तरमीमांसाकारः मध्यमभ्रातासायणः कथञ्चिदपि भवितुं नार्हत्येव। यतोहि पूर्वमीमांसायां "जैमिनीयन्यायमालाविस्तरः" तथा उत्तरमीमांसायां वेदान्तपञ्चदशी, दशोपनिषद्दीपिका, वृहदारण्यकोपनिषद्वार्तिकसारः, जीवन्मुक्तिविवेकप्रभृतयोग्रन्थाः माधवाचार्यैरेवप्रणीतम् । ते एव अग्रिमाश्रमे विद्यारण्यनाम्ना विभूषितः। अतः एभिर्प्रमाणैः संसिध्यति यत् चतुर्वेदभाष्यकार विद्यारण्यस्वामि न तु सायणः ।

**कूट शब्दः** चतुर्वेदभाष्यकारः आचार्यसायणः, अग्रिमाश्रमे विद्यारण्यनाम्ना, नैकेषु अर्वाचीनग्रन्थेषु

## प्रस्तावना -

श्रीमदखिलाण्डकोटिब्रह्माण्डनायकस्य जगतः जन्मादीनां कारणहेतुभूतस्य स्वेदजाण्डजोद्भिदजरायुजादीनाम् अन्तर्यामिरूपस्य आब्रह्मकीटोत्पादकरूपस्य स्थावरजङ्गमादीनां

बीजरूपस्य ऐश्वर्यादि षड्गुणसम्पन्नस्येश्वरस्य निःश्वासरूपोऽयं वेदराशिः। वस्तुतः अनन्तज्ञानराशेर्वेदस्य संहिताब्राह्मणमारण्यकोपनिषदाञ्च सुबोधनाय तथा वेदार्थान् अनधिगम्य अज्ञानान्धकारे निपतितानां मनुष्याणां वेदार्थज्ञानमुद्रेकार्थं समग्रवैदिकवाङ्मयस्य भाष्यं माधवाचार्यैः कृतम्। यस्तु कालान्तरे चतुर्थाश्रमे प्रविश्य श्रृङ्गगिरौ विद्यारण्यस्वामि-नाम्ना विभूषितः।

वस्तुत एते भारद्वाजीयाः कृष्णयजुर्वेदिनः तथा बौधायनसूत्राध्यायिनः आसन्। एतेषां जन्म चतुर्दशशतके इति ऐतिहासिककाराणामभिप्रायः (1372-1444) । तेषां पितुः नाम मायणः तथा मातुः नाम श्रीदेवी आसीत्। इमे त्रयः भ्रातरः आसन् माधवः सायणः भोगनाथश्च। प्रसङ्गेऽस्मिन्नुच्यते माधवाचार्यप्रणीतपराशरस्मृतौ -

श्रीमती जननी यस्य सुकीर्तिमायणः पिता।
सायणो भोगनाथश्च मनोवुद्धीसहोदरौ॥
यस्य वौधायनं सूत्रं शाखा यस्य च याजुषि।
भारद्वाजकुलं यस्य सर्वज्ञः स हि माधवः॥

असौ माधवः न तु केवलं वेदादिशास्त्रेषु निपुण आसीत्, अपि तु सः व्याकरणे पण्डितश्चासीदित्यलंकारसुधानिधौ उक्तम्-

अस्ति श्रीसङ्गक्ष्मापः पृथ्वीतलपुरन्दाः।
तस्य मन्त्रिशिरोरत्नमस्ति मायण सायणः॥
तेन मायणपुत्रेण सायणेन मनीषिणा।
आख्यया माधवीयेयं धातुवृत्तिर्विरच्यते॥

परम्पराक्रमेण तेषां भ्रातृणां त्रयः गुरवः आसन्। विद्यातीर्थः, भारतीतीर्थः, श्रीकण्ठश्चेति। तत्रादौ माधवः स्वकीयजैमिनीयन्यायमालाविस्तरे स्वगुरुं विद्यातीर्थं परमात्मारूपेण स्वीचकार-

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम्।
जैमिनीयन्यायमाला श्लोकैः संगृह्यते स्फुटम्॥

तत्र विद्यारण्योऽपि स्वकृतवेदादिग्रन्थानामारम्भे एवं लिखति -

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥ इति।

विद्यारण्यस्य अन्तिमगुरुः श्रीकण्ठ आसीदिति काञ्चीपुरशिलालेखात् ज्ञायते -

श्रीकण्ठनाथो गुरुः।

माधवोऽपि स्वकीयकालनिर्णये एवमाह -

हृदि भजे श्रीकण्ठमव्याहतम्॥ इति।

माधवाचार्यप्रणीतकालनिर्णये एतेषां (गुरूणां) नामानि इत्थं प्रदत्तानि -

सोऽहं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थे परं
मज्जन् सज्जनसंगतीर्थनिपुणः सद्वृत्ततीर्थाश्रयन्।
लब्ध्वामाकलयन् प्रभावलहरीं श्रीभारतीतीर्थतो
विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकण्ठमव्याहतम्॥

तत्र वस्तुतः चतुर्वेदभाष्यकर्ता तथा धातुवृत्तेर्विधाता माधवाचार्य एव विद्यारण्यस्वामी इति।
प्रसङ्गेऽस्मिन् उच्यते अहोबिलपण्डितेन तेलुगुव्याकरणे -

वेदानां भाष्यकर्ता विवृतमुनिवचा धातुवृत्तेर्विधाता
प्रोद्यद्विद्यानगर्यो हरिहरनृपतेः सार्वभौमत्वदायी।
वाणी नीलाहिवेणी सरसिजनिलया किंकरीति प्रसिद्धा
विद्यारण्योऽग्रगण्योऽभवदखिलगुरुः शंकरो वीतशंकः॥

अतः अत्र संसिध्यति यत् चतुर्वेदभाष्यकारः माधवाचार्य एव विद्यारण्य इति।
तर्हि एभिर्प्रमाणैः संसिध्यति यत् मायणस्य ज्येष्ठपुत्रः माधवः नाम विद्यारण्यस्वामीः एव चतुर्वेदभाष्यकारः इतिचेत् तन्न।

**पूर्वपक्षः-**

वस्तुतः विजयनगरसाम्राज्यप्रतिष्ठापकः श्रीमद्राजाधिराज श्रीवीरवुक्कमहिपतेः प्रधानामात्य तथा मायणस्य मध्यमपुत्रः 'सायणः' एव चतुर्वेदभाष्यकर्ता न तु माधवः। यतोहि चतुर्णामपि वेदानां संहिता भाष्योपक्रमे यदि वयं परिशीलयामः, तर्हि तत्र स्पष्टतया उट्टङ्कितो दृश्यते यत् आचार्यसायणः वीरवुक्कमहिपतेरादेशात् भाष्यं निरमायीति। सर्वादौ वैदिकसंशोधनमण्डलपूणेतः 1993 अनन्तरं 1995 तमे वर्षे ऋक्संहितायाः वारद्वयं मुद्रणं सम्पादितम्। तत्र एवं वर्णना विद्यते-

(1) **ऋक्संहितायाः भाष्योपक्रमे -**

स प्राह नृपतिं राजन् सायणार्यो ममानुजः।
सर्वं वेत्त्येष वेदानां व्याख्यातृत्वे नियुज्यताम्॥
इत्युक्तौ माधवार्येण वीरवुक्कमहीपतेः।
अन्वगात् सायणाचार्यं वेदार्थस्य प्रकाशने॥ इति।

तस्यामेव संस्थायां सर्वप्रथमं 1965 तमे वर्षे चौखम्बातः रत्नगोपालभट्टेन मुद्रितम् काण्वशाखायाः विद्यारण्यभाष्यम्। तत्र तु आदिशत् सायणाचार्यं वेदार्थस्य प्रकाशने इति अस्ति। तदनुसारं 1988 तमे वर्षे वैदिकसंशोधनमण्डलपुणेतः मुद्रितकाण्वशाखायाः भाष्योपक्रमे वर्ण्यते-

(2) **शुक्लयजुःकाण्वसंहितायाः भाष्योपक्रमे -**

यत्काटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः।
आदिशत् सायणाचार्यं वेदार्थस्य प्रकाशने॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात्।
कृपालुः सायणाचार्यः वेदार्थं व्याकरोत् खलु॥ इति।

तत्र 1983 तमे वर्षे सत्यव्रतसामश्रमिभट्टाचार्येण सामवेदसंहितायाः मुद्रणं मुन्षिराम मनोहर-लाल-पब्लिकेशन्, नवदेहल्यां कृतम्। तस्मिन् ग्रन्थे -

(3) **सामवेदसंहितायाः भाष्योपक्रमे** -

यत्काटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः।
आदिशत् सायणाचार्यं वेदार्थस्य प्रकाशने॥

अनन्तरम् अथर्ववेदस्यापि 1960 तमे वर्षे विश्वबन्धुनां विश्वेश्वरानन्द-वैदिक-शोध-संस्थानपक्षतः एकः ग्रन्थः मुद्रितः। एवमेव अस्यैव वेदस्य 1990 तमे वर्षे पण्डितरामशर्मा-गौडेन चौखम्बाविद्याभवनतः हिन्दीव्याख्यासहिताथर्वणवेदस्य मुद्रणं कृतम्। परन्तु उभयोः ग्रन्थयोः भाष्योपक्रमे इदमेव प्रमाणं लभ्यते यत् –

(4) **अथर्ववेदसंहितायाः भाष्योपक्रमे** –

आदिशत् सायणाचार्यं वेदार्थस्य प्रकाशने॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात्।
कृपालुः सायणाचार्यः वेदार्थं व्याकरोत् खलु॥ इति।

एतावता ऋग्यजुःसामाथर्वाख्यानां चतुर्णां वेदानाम् आद्यसंहितादिषु वर्णितभाष्योपक्रमे मायणस्य मध्यमपुत्रः सायणः एव वेदभाष्यकर्ता इति उट्टङ्कितो दृश्यते। तदस्माभिरालोचितम्। तत्र न केवलं भाष्योपक्रमे अपि तु चतसृणामपि संहितानां भाष्यान्ते च श्रूयते। यथा -
'इति श्रीमद्राजाधिराजपरमेश्वर-वैदिकमार्गप्रवर्तक-श्रीवीरवुक्कसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते

माधवीयवेदार्थप्रकाशने ऋक्संहिताभाष्ये प्रथमाष्टके प्रथमोऽध्यायः’। इत्येवं रूपेण चतसृणामपि संहितानां भाष्यान्ते च आचार्यसायण एव वेदभाष्यकर्ता इति प्रमाणं लभ्यते। अतः सायणो वेदभाष्यकर्ता इत्यस्माभिरभिमतमिति-पूर्वपक्षः।

**सिद्धान्तः**

भोः अनवगतबुध्या न तथा भाषिष्ठाः। कुतः? इत्युक्तौ चतुर्णामपि वेदानां संहिताभाष्योपक्रमे प्रक्षिप्तश्लोकानुदाहृत्य तथा उपसंहारे च पक्षैकदेशं स्वीकृत्य निर्णयः न कर्तव्यः। अतस्तावत् निरपेक्षबद्धिर्वक्तव्यम्।

वस्तुतः मायणस्य ज्येष्ठपुत्रः माधवः एव वेदभाष्यकर्ता। विषयेऽस्मिन् उच्यते ऋक्संहितायाः भाष्योपक्रमे -

यत् कटाक्षेण तदूपं दधद्बुक्कमहीपतिः।
आदिशन् माधवाचार्यं वेदार्थस्य प्रकाशने॥ इति।

पुनः चतुर्णामपि वेदानां भाष्योपसंहारे च-‘माधवीये वेदार्थप्रकाशने’ इतीदं वाक्यं प्रत्यध्यायम् असकृत् उच्चारितं दृश्यते। अतः ‘माधवाचार्यः’ एव वेदभाष्यकर्ता न तु सायणः इति निश्चप्रचम्।

**पूर्वपक्षः**

मैवम्। आचार्यसायणः एव चतुर्वेदभाष्यकर्ता न तु माधवः। यतोहि वीरवुक्कमहीपतेः राजसभायाम् असौ माधवः अमात्यरूपेणासीत्। प्रसङ्गेऽस्मिन् उच्यते-अलङ्कारसुधानिधौ-

अस्ति श्रीसङ्गक्ष्मापः पृथ्वीतलपुरन्दरः।
तस्य मन्त्रिशिरोरत्नमस्ति मायण-सायणः॥
तेन मायणपुत्रेण सायणेन मनीषिणा।
आख्याया माधवीयेयं धातुवृत्तिर्विरच्यते॥

अतः बुक्कमहीपतिः आदौ वेदभाष्यकर्तुं माधवाचार्यम् आदिदेश-

यत्कटाक्षेण तद्रूपं दधद् बुक्कमहीपतिः।
आदिशन् माधवाचार्यं वेदार्थस्य प्रकाशने॥ (ऋक्संहिता भाष्योपक्रमे)

परन्तु एतेषामुपरि कार्यभारः अधिक आसीत्। अतः असौ माधवः वेदभाष्यार्थं स्वानुजम् आचार्यसायणं प्रचोदयामास। तथा च बुक्कमहीपतिं प्रार्थयामास यत्-

सप्राह नृपतिं राजन् सायणार्यो ममानुजः।
सर्वं वेत्येष वेदानां व्याख्यातृत्वे नियुज्यताम्॥
इत्युक्तौ माधवार्येण वीरवुक्कमहीपतेः।
अन्वगात् सायणाचार्यं वेदार्थस्य प्रकाशने॥

‘सप्राह नृपतिं राजन्’ इत्यादि श्लोकाभ्याम् अयम् अर्थः स्फुरति यत् - माधवाचार्येण वुक्कमहिपतिं निवेदितं यत् ‘भो राजन् ममानुजोसायणः सर्वं वेत्ति अतः तम् अस्मिन् वेदभाष्यकार्ये नियुज्यतामिति। तदनु माधवाचार्यस्य प्रार्थनानुगुणं महाराजावुक्कः वेदभाष्यकर्तुं ‘सायणाचार्यम्’ आदिष्टवान्। अतः आचार्यसायणः चतुर्णामपि वेदानां समग्रभाष्यं निर्माय उदासीनो भूत्वा स्वज्येष्ठभ्रातुः नाम्ना समर्पितवान्। तस्मात् भाष्यान्ते ‘माधवीये वेदार्थप्रकाशने’ इति उल्लिखितं वर्तते।

अतः वेदभाष्याणाम् अन्ते-‘माधवीये वेदार्थप्रकाशने’ इतीदं वाक्यं यद्भवता प्रमाणार्थं प्रतिपादितम् तदस्माभिः खण्डितम्। सोदाहरणानि प्रमाणानि च अस्माभिरूपन्यस्तानि। अतः अनेन स्पष्टं भवति यत् आचार्य सायणः एव चतुर्वेदभाष्यकर्ता न तु माधवः इति पूर्वपक्षः।

**सिद्धान्तः-**

भवदुक्तप्रमाणानि अत्यन्तं रुचिकराणि न तु प्रमाणयुक्तानि। भवद्भिः नैकानि प्रमाणानि संप्रदर्श्य आचार्यसायणः एव चतुर्वेदभाष्यकर्ता न तु माधवः इति निजमतं स्थापितम्।

परन्तु इयं भावना सर्वथा अपनोदनीया। यतोहि इयं भ्रान्तधारणा लोके केनापि प्रचारिता। वस्तुतः ऋक्संहितायाः भाष्योपक्रमे अधः

उद्धरणरुपेण इमौ द्वौ प्रक्षिप्तौ श्लोकौ वर्णितौ इति तत्र स्पष्टमुट्टङ्कितम्। अतः 'स प्राह नृपतिं राजन्' तथा 'इत्युक्तौ माधवार्येण' इतीमौ दौ श्लोकौ यद्धवता प्रतिपादितौ तन्निरस्तौ। किञ्च आचार्यसायणस्य ज्येष्ठभ्राता माधवः बुक्कमहिपतेः राजसभायां मन्त्रिरूपेणासीदिति विचारोऽयं सर्वथा असमीचीनः। यतोहि सायणस्याग्रजः असौ माधवः राजगुरुपदव्याम् आसीत्। अमात्यपदव्यां तत्र कश्चिदपरोमाधवः विभ्राजते स्म। सन्दर्भेऽस्मिन् रामचन्द्रगोविन्दकोलंगडेन 'श्रीमद् सायणाचार्य' इति मराठीपुस्तके सप्रमाणं निरूपितम्। येन स्पष्टं भवति यत् मन्त्रिमाधवः भिन्नः तथा चतुर्वेदभाष्यकारः राजगुरुः सकलविद्याविशारदः श्रीमाधवाचार्यः पृथगिति विषयस्पष्टीकरणाय अधः सारणी प्रस्तूयते-

| चतुर्वेदभाष्यकर्ता श्रीमन्माधवाचार्यः | अमात्यमाधवः |
|---|---|
| पिता - मायणः | पिता – चाउड,चौण्डः |
| माता – श्रीमती | माता – माचाम्बिका |
| गोत्रः – भरद्वाजः | गोत्रः – आङ्गिरसः |
| गुरुः – विद्यातीर्थः, भारतीतीर्थः, श्रीकण्ठः | गुरुः – काशीविलाशः, क्रियाशक्तिः |
| इष्टदेवी - भुवनेश्वरी | इष्टदेवी – त्र्यंबकेश्वरः |
| संप्रदायः – अद्वैतः - स्मार्तः | संप्रदायः – शैवः पाशुपतः |
| जातिः –कर्णाटकस्थ आन्ध्रब्राह्मणः | जातिः – गौडसारस्वतब्राह्मणः |
| शाखा – यजुर्वेदी तैत्तिरियः | शाखा – ऋग्वेदी |
| पदवी – विजयनगरसाम्राज्यस्य प्रमुखः राजगुरुश्च | पदवी – मारप्पवडेयराज्ञः मन्त्री तथा सेनापति |
| वासस्थानम् - विजयनगरम् | वासस्थानम् – जयन्तीपुरम् |
| नामानी – माधवः, माधवाचार्यः, विद्यारण्यः | नामानी– माधवः, माधवाचार्यः, माधवमन्त्री, अमात्यः, राज्यपालः, बनवासी, गोका |
| ग्रन्थाः – पराशरमाधव, सर्वदर्शनसंग्रहः,पञ्चदशी, चतुर्वेदभाष्यम् इत्यादि | ग्रन्थाः – सूतसंहिता, तात्पर्यदीपिका |
| बिरुदावली – कर्णाटकसिंहासनस्थापनाचार्यः, वेदमार्गप्रतिष्ठाचार्यः, विदारत्नमहोदधीः | बिरुदावली –राज्यपालः , मन्त्रीवर्यः, माधवरसः, उपनिषन्मार्गप्रवर्तकः |

उपरोक्तप्रमाणानुसारं ज्ञायते यत्- वेदभाष्यकारः माधवाचार्यः तथा अमात्यमाधवः इत्यनयोः भेदः अस्तीति। यत्तु ऐतिहासिकैर्नालोचितम्। अतः इयं भ्रान्तभावना सर्वथा परिष्करणीया तत्र माधवाचार्यः एव चतुर्वेदभाष्यकारः न तु सायणः इति सिद्धम्।

**पूर्वपक्षः-**

मैवम्। सुपरिष्कृतविचारयुक्तान् अस्मान् भ्रान्तवादीत्युच्चार्यमाणाः ऊर्ध्वद्रष्टारो यूयं अग्रे गर्ते पतिष्यथ। तत्र अस्माकं नापराधः। 'नैषस्थाणोरपराधः यदेनम् अन्धो न पश्यतीति' यास्कवचनात्। यतोहि-ऋगादिचतुर्षु वेदेषु भाष्योपक्रमे स्पष्टं भाति यत् -

ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात्।
कृपालुः सायणाचार्यः वेदार्थं व्याकरोत् खलु॥

अतः अनेनापि प्रमाणेन इदं स्पष्टं भवति यत् पूर्वोत्तरमीमांसाकारः आचार्यसायणः एव वेदभाष्यकर्ता न तु माधवः।

**सिद्धान्तः-**

उन्मत्तबालवाक्यवत् भवतां वचांसि परित्यक्तव्यानि भवन्ति। कथमिति अधस्ताद्वक्ष्यतेऽधुना। वस्तुतः पूर्वोत्तरमीमांसाकारः भवति आचार्यमाधवः न तु सायणः। पूर्वश्लोकाभ्यां प्रभावितः सन् अर्वाचीनैः 'सायणस्य' नाम तत्र तत्र समुट्टङ्कितम्। वस्तुतः स च श्लोकः एवं भवेत्-

ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात्।
कृपालुः माधवाचार्यः वेदार्थं व्याकरोत् खलु॥ इति

श्लोकस्यास्य यथार्थविचारः अधः सारण्यां प्रस्तूयते।

**माधवाचार्यः / विद्यारण्यस्वामी**

| पूर्वमीमांसाग्रन्थाः | उत्तरमीमांसाग्रन्थाः |
|---|---|
| 1. जैमिनीयन्यायमालाविस्तरः (सम्पूर्ण पूर्वमीमांसाशास्त्रमधीकृत्य रचितम्) | 1. पञ्चदशी |
| 2. अन्येग्रन्थाः | 2. सर्वदर्शनसंग्रहः |
| 3. कालमाधवः | 3. जीवन्मुक्तिविवेकः |
| 4. पराशरमाधवीयम् | 4. विवरणप्रमेयसंग्रहः |
| 5. आचारमाधवीयम् | 5. बृहदारण्यकोपनिषद् |
| 6. व्यवहारमाधवः | 6. अपरोक्षानुभूति |
| 7. शङ्करदिग्विजयः इत्यादि | 7. दशोपनिषद्दीपिका |
| | 8. दृक्दृश्यविवेकः |
| | 9. नृसिंहपूर्वतापिनी उपनिषद्भाष्यम् |
| | 10. वेदान्ताशीर्वाद इत्यादी |

**आचार्यसायणः**

एतैः पूर्वमीमांसायां तथा उत्तरमीमांसायां कोऽपि ग्रन्थः न रचितः। एतेषां ग्रन्थाः इमे भवन्ति-

| | |
|---|---|
| 1. सुभाषितसुधानिधि, 2. प्रायश्चित्तसुधानिधिः, 3. अलंकारसुधानिधिः | 4. पुरूषार्थसुधानिधि, 5. आयुर्वेदसुधानिधिः, 6. यज्ञतन्त्रसुधानिधिः इत्यादि। |

विषयेऽस्मिन् 'श्रीमत्सायणाचार्य' इति मराठीपुस्तके प्रमाणं लभ्यते। अतः उपरिनिर्दिष्टसारणीं वीक्ष्य स्वाभिमतं सुविचार्य पुनरस्माभिरूपन्यस्तं यत् - पूर्वोत्तरमीमांसाकारः 'माधवाचार्यः' एव चतुर्वेदभाष्यकारः न तु सायणः।

किञ्च काण्वशाखायाः सत्सु नैकेषु भाष्यकारेषु अनन्ताचार्यः भवति अन्यतमः। असौ अनन्ताचार्यः काण्वसंहितायाः उत्तरविंशतेः भाष्योपक्रमे माधवाचार्यैः एव काण्वपूर्वविंशतिः रचितम् इति वर्णयति। यथा -

व्याख्याता काण्वशाखीयसंहिता पूर्वविंशतिः।
माधवाचार्यवर्येण स्पष्टीकृत्य न चोत्तरा॥
अतस्तां व्याकरिष्येहमनन्ताचार्यनामकः।

अनेक ग्रन्थानालोक्य क्रियते दीपिका मया॥

उपरोक्तशास्त्रोक्तप्रमाणेन निश्चप्रचत्वेन वक्तुं शक्यते यन्माधवाचार्यः एव वेद भाष्यकर्ता न तु सायणः।

**पूर्वपक्षः**

न! वयं नाङ्गीकुर्मः भवतामभिमतम्। कानिचन प्रमाणानि इतस्ततो संगृह्य मधुरवचोभिः उद्बोधयन्त्यस्मान्। अस्मास्वपि वर्तन्ते ऐतिहासिकप्रमाणानि लोकव्यवहारे यानि प्रथितानि सन्ति। 'शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्यात् व्यवहारतश्च' इत्यनेन न्यायेन व्यवहारप्रमाणम् अधिकृत्य ऐतिहासिकप्रमाणानि संप्रदर्श्य सप्रमाणं प्रमाणयितुं शक्यते यदाचार्यसायणः एव वेदभाष्यकारः। माधवो न इति।

**तथा हि कानिचन उदाहरणानि अधस्तात् उदाह्रीयन्ते।**

1. डा. गजानन शास्त्री मूसलगाँवकरेण 'वैदिकसाहित्य का इतिहास' इत्यस्मिन् ग्रन्थे- 'आचार्यसायणः वेदभाष्यकर्ता' इति उल्लिखितम्।
2. पद्मभूषण आचार्य श्री बलदेव उपाध्यायेन संस्कृत-वाङ्मय का बृहद् इतिहास - प्रथमखण्डे विंशति अध्याये 639-640 तमे पुटे आचार्यसायणः आदौ तैत्तिरीयसंहितायाः भाष्यं कृत्वा पश्चात् ऋगादिनां भाष्यं कृतवान् इति वर्णितोऽस्ति।
3. आचार्यजगदीशमिश्रेण 'वैदिक वाङ्मयस्येतिहासः' इत्यस्मिन् ग्रन्थे-32 तमे पुटे सायणः एव चतुर्वेदभाष्यकारः इति प्रतिपादितम्।
4. पण्डितभगवद्दत्तेन 'वैदिक वाङ्मय का इतिहास' इत्यस्मिन् ग्रन्थे अपि सायणः एव चतुर्वेदभाष्यकर्ता इति सप्रमाणम् उपन्यस्तम्।
5. वेदाचार्य डा.रघुवीरवेदालङ्कारेण 'वैदिकसाहित्य का इतिहास' इत्यस्मिन् ग्रन्थे-आचार्यसायणः एव वेदभाष्यकर्त्ता इति समचर्चितम्।
6. आचार्य पारसनाथद्विवेदिमहोदयेन 'वैदिकसाहित्य का इतिहास' इत्यस्मिन् ग्रन्थेऽपि आचार्यसायणः एव वेदभाष्यकर्ता इति सप्रमाणं निरटङ्कि।

तर्हि एवं रूपेण एभिः प्रमाणैः संसिध्यति यदाचार्यसायणः एव चतुर्वेदभाष्यकर्ता न तु माधवः। इति पूर्वपक्षः।

**सिद्धान्तः**

सत्यां च ईदृश्यां स्थितौ वयं सैद्धान्तिकाः इदं ब्रूमः यत्- 'व्यवहारप्रमाणम्' पुरस्कृत्य भवदुक्त ऐतिहासिकप्रमाणानि पृष्ठतो निधाय अज्ञानान्धकारे दन्द्रम्यमाणान् युस्मान् ज्ञानोद्रेकार्थं विभिन्नग्रन्थप्रदीपैः असकृत् मार्गं प्रदर्शयामो वयम्। नैकेषु ग्रन्थेषु माधवाचार्यः एव चतुर्वेदभाष्यकर्ता इति वर्णितोऽस्ति। यस्तु चतुर्थाश्रमे प्रविश्य श्रृङ्गगिरौ विद्यारण्यनाम्ना विभूषितस्सन् शङ्कराचार्यपदमलंचकार। किञ्च ततः परं पूर्वाश्रमे रचित वेदभाष्यग्रन्थाः विद्यारण्यभाष्यनाम्ना विख्याताः जाताः। अतः चतुर्वेदभाष्यकारः विद्यारण्यः न तु सायणः। विषयेऽस्मिन् सिद्धान्तमतस्थापनाय कानिचन उदाहरणानि अधः प्रस्तूयन्ते।

1. श्रृङ्गगिरौ मुद्रितविद्यारण्यस्वामिपादानाम् अष्टोत्तरशतनामावल्यां षष्ठतमनामवर्तते चतुर्वेदभाष्यसमुल्लसत्कर्त्रे नमः। इति।
2. श्रीविद्यार्णवतन्त्रे उपोद्घाते विद्यारण्यस्वामी चतुर्वेदभाष्यकर्त्ता इति ग्रन्थसम्पादकेन श्रीदत्तात्रेयानन्दनाथेन लिखतम्।
3. तेलुगुव्याकरणे ग्रन्थकारेण अहोबिलपण्डितेन वेदभाष्यकर्त्ता विद्यारण्यं स्तौति-

   वेदानां भाष्यकर्ता विवृतमुनिवचा धातुवृतेर्विधाता
   प्रोद्यद्विद्यानगर्यो हरिहरनृपतेः सार्वभौमत्वदायी।
   वाणी नीलाहिवेणी सरसिजनिलया किंकरीति प्रसिद्धा
   विद्यारण्योऽग्रगण्योऽभवदखिलगुरुः शंकरो वीतशंकः॥
4. वेदान्तपञ्चदश्याम् उपक्रमे चतुर्वेदभाष्यकारः श्रीमद्विद्यारण्यः इति समुल्लिखितो दृश्यते।

5. तिरुमलातिरुपतिदेवस्थानतः (ढ.ढ.ऊ.) डा. जी.पद्मजा देव्या विरचिते 'विद्यारण्य' नाम्ना हिन्दीपुस्तके 20 तमे पुटे स्वयं विद्यारण्यः चतुर्वेदभाष्यकर्त्ता इति उट्टङ्कितम्। तत्र सायणाचार्यस्य भाष्यरचनायां सहभागिता अस्ति इति पुस्तकेऽस्मिन् वर्णितो दृश्यते।
6. श्रीशङ्करविजयमु इति तेलुगुग्रन्थे श्रीशुद्धचैतन्यस्वामिना ग्रन्थोपक्रमे उपन्यस्तं यत् श्रीविद्यारण्यस्वामी चतुर्वेदभाष्यकर्ता वर्तते इति।
7. श्रीविद्यारण्यस्वामिप्रणित 'जीवन्मुक्तिविवेकः' इत्यस्मिन् ग्रन्थे उपक्रमे एव चतुर्वेदभाष्यकर्त्ता श्रीमद्विद्यारण्यः इति वर्णितो दृश्यते।
8. 'श्रीमद् सायणाचार्य' इति मराठीपुस्तके ग्रन्थकर्ता रामचन्द्रगोविन्दकोलंगडेन विद्यारण्यस्वामिनः विरुदावल्यां स्पष्टं प्रदर्शितं यत् 'वेदभाष्यप्रकाशकः' तथा 'वैदिकमार्गस्थापनाचार्यः' इति।यथा- 'पदवाक्यप्रमाणपारावारपारीण-यमनियमासन-प्राणायामप्रत्याहारध्यानधारणासमाध्यष्टांगयोगानुष्ठाननिष्ठाग रिष्ठ-तपश्चक्रवर्त्यनाद्य-विच्छिन्नगुरुपरंपरानन्दबोधः-प्राप्तषड्दर्शनस्थापनाचार्य-व्याख्यानसिंहासनाधीश्वर-सकलवेदार्थप्रकाशक-सांख्यत्रयीप्रतिपालक-सकलनिगमागमसारहृदय-वैदिकमार्गप्रवर्तक-सर्वतंत्रस्वतन्त्रादिराजधानी-श्रीमद्विद्यानगर महाराजधानी-कर्नाटकसिंहासनप्रतिष्ठापनाचार्य-तुंगभद्रातीरनिवास-ऋष्यश्रृंगपुराधीश्वर' इति।
9. डा.गजानन शास्त्री मूसलगाँवकरेण 'वैदिकसाहित्य का इतिहास' इत्यस्मिन् ग्रन्थे लिखितं यत् वेदभाष्यरचनानन्तरं हरिहरवुक्कः-सायण प्रभृतित्रयाणां विदुषां सम्माननम् कृतम् इति काञ्चिपुरशिलालेखात् ज्ञायते। अनेन स्पष्टं भवति यत् वेदानां भाष्यकर्ता न तु केवल सायणः आसीत्। अपितु इतरे विद्वांसः अप्यासन्।
10. मैसूरू नगरस्थ ङ. L.N.शास्त्रिमहोदयेन श्रृङ्गगिरौ उषित्वा विद्यारण्यस्वामिपादानां विषये अनेकानि प्रमाणानि संगृह्य श्रृङ्गेरिपीठाधीशश्रीमद्जगद्गुरुशङ्कराचार्य-भारतीकृष्णतीर्थ महास्वामिनाम् आशीर्वादेन च 'श्रीविद्यारण्यगारु' इत्याख्यकनडभाषया पुस्तकमेकं रचितम्। तत्र सम्पूर्णग्रन्थस्य अवलोडनेन ज्ञायते यत् विद्यारण्यस्वामिपादानाम् आध्वर्यवे तेषां मार्गदर्शनेन च वेदानां भाष्यं सम्पादितमिति। ग्रन्थोक्तप्रमाणानि पुटानुगुणम् अधस्तात् प्रस्तूयन्ते।

**पुस्तकेऽस्मिन् -**

- 387 तमे पुटे-चतुर्णामपि वेदानां भाष्यरचनाविषये टिप्पणीरुपेण प्रमाणानि दत्तानि।
- 388 तमे पुटे-चतुर्वेदभाष्यनिर्माणे पद्धतीविषयकज्ञानसम्पादनार्थं टीका निर्मिता एतैः। तत्र कं ग्रन्थं, कः लिखेत् इति स्वामिपादैः निर्णयः कृतः।
- 415 तमे पुटे - भाष्यनिर्माणार्थं भारतस्य विभिन्नेभ्यः प्रान्तेभ्यः पञ्चाशदुत्तर विदुषाम् आवाहनं वुक्कमहिपतीना कृतम्। तत्र सायणः, पण्डरिदीक्षितः, नारायणवाजपेययाजी, नरहरिसोमयाजी प्रभृतयः प्रमुखसहायककर्त्तारः आसन्।
- 442 तमे पुटे-काश्यां विद्वन्मण्डलि समाहूय भाष्याणां विषये टीकाः तथा भाष्यशैली विषये विद्यारण्यस्वामिना टिप्पणी दत्तम्।
- 453 तमे पुटे-अन्तिमचरणे स्थितवेदभाष्यस्य समाप्तिपर्यन्तं श्री विद्यारण्यस्वामिपादाः श्रृङ्गगिरौ एव स्थातुं निर्णयं कृतवन्तः।
- 459 तमे पुटे-वेदभाष्यस्य कतिपय अंशाः सायणाचार्येण लिखिताः। तस्मात् सायणस्यापि नाम वेदभाष्यकारेषु परिगणितो दृश्यते।
- 460 तमे पुटे - विद्यारण्यस्वामिना स्वयमेव सम्पूर्णभाष्यं परिस्कृतमिति प्रमाणं लभ्यते।

**उपसंहारः -**

एभिः प्रमाणैः संसिध्यति यत् विद्यारण्यस्वामिनां वेदभाष्यनिर्माणे महद्योगदानम् आसीत्।

उपरि निर्दिष्टप्रमाणानां परिशीलनेन ज्ञायते यत् इदमेकं सघकार्यम् आसीत्। इदानीं यत् आङ्गलभाषायां Team work इति कथ्यते। यत्तु Project प्रभृतिषु अस्माभिः द्रष्टुं शक्यते। तत्र यथा कश्चित् प्रमुखः भवति सर्वेषां नियन्त्रकः तथैव वेदभाष्यरचना-वेलायामपि पञ्चाशत् (50) संख्यकविदुषां मध्ये विद्यारण्यस्वामिपादाः तेषां मार्गदर्शकरूपेण प्रमुखाः आसन्। स्वयं राज्यकार्यं निर्वहन्तः उभयत्र स्वकीयविचक्षणदृष्टिं प्रसारितवन्तः तदा तदा अनुजसायणस्य कृते भाष्यपरिशीलनार्थं दायित्वं न्यस्तवन्तश्च। अनेन स्पष्टं भवति यत्- विद्यारण्यस्वामिपादाः एव भवन्ति समग्रवैदिकवाङ्मयस्य भाष्यकर्तारः। स्वकीयविचक्षणबुद्ध्या भगवत्याः शारदाम्बायाः कृपाकटाक्षेण च वेदार्थरूपं दुर्गममार्गं प्रविश्य मन्त्रार्थान् परिष्कृत्य अज्ञानान्धकारे निपतितान् अस्माकं समेषां जगद्गुरुस्वरूपेण चक्षुरुन्मीलितवन्तः।

अन्ततो गत्वा निकर्षात्मकं वाक्यमिदं समुज्जृम्भते मुखात् यत् चतुर्वेदभाष्यकारः श्रीमद्विद्यारण्यः न तु सायणः इत्यस्मदभिमतं तद्भवताप्यङ्गीकर्त्तव्यम् इति राद्धान्तः।

**परिशीलितग्रन्थसूची**


1. ऋक्संहिता विद्यारण्यभाष्यम् – चौखम्बाविद्याभवनम्, वाराणासी, 1983
2. तौत्तिरीयसंहिता विद्यारण्यभाष्यम् – वौदिकसंशोधनमण्डल, पुणे, 1892
3. तैत्तिरीयारण्यक विद्यारण्यभाष्म् – आनन्दाश्रमः, संस्कृतग्रन्थावली, 2008
4. काण्वसंहिता विद्यारण्यभाष्यम् - वैदिकसंशोधनमण्डल,पूणे, 1988
5. निरुक्तम् - मुकुन्दझा शर्मा, चौखम्बाविद्याभवनम्, वाराणासी, 2012
6. मनुस्मृति – चौखम्बाविद्याभवनम्, वाराणसी, 1990
7. याज्ञवल्क्यस्मृति – चौखम्बाविद्याभवनम्, वाराणसी, 2003
8. वृहदारण्यकोपनिषद् – गीताप्रेस, गोरखपुर, उत्तरप्रदेश, 1971
9. वेदभाष्यभुमिकासंग्रहः, वलदेवउपाध्यायः, चौखम्वाविद्याभवनम्, वाराणसी, 1985
10. वैदिक साहित्य का इतिहास – चौखम्वा विद्याभवनम्, वाराणसी, 2002
11. श्रीशंकरविजयमु – टि. शिवचरणमु,व्यासाश्रमः,येर्पेडु, D.M.E MADRASS , 1988
12. शुक्लयजुर्वेदसंहिता – उवटमहिधरभाष्योपेता, चौखम्बाविद्याभवनम्, वाराणसी, 2011
13. वैदिकवाङ्मयस्येतिहासः, जगदिशमिश्रः, चौखम्बाविद्याभवनम्, वाराणसी 2009
14. वैदिक वाङ्मय का इतिहास – भगवद्दत्त,वैदिक संशोधनमण्डल, पूणे, 1994
15. वैदिक साहित्य का इतिहास – पारसनाथद्विवेदि, नागपब्लिकेशन्, नई दिल्ली, 2015
16. वैदिक साहित्य का इतिहास – रघुवीर वेदालंकार, परिमलपब्लिकेशन्, नई दिल्ली, 2010
17. संस्कृतवाङ्मय का वृहद् इतिहास- बलदेव उपाध्याय,उत्तरप्रदेश संस्कृतसंस्थान, 1995
18. श्रीविद्यार्णवतन्त्रम्- दत्तात्रेयानन्दनाथ,नगवा,वाराणसी,2009
19. श्रीशंकरविजयमु – शुद्धचैतन्यस्मामि,चित्तुरु,1988
20. जीवन्मुक्तिविवेकः – उदयनारायणसिंह, चौखम्बाविद्याभवनम्, वाराणसी, 1999
21. श्रीविद्यारण्यगारु- एल्.एन्.शास्त्रि, मैसूरु, 2011
22. विद्यारण्य- जी.पद्मजा TTD, तिरुपति, 2014
23. श्रीमत् सायणाचार्य – रामचन्द्रगोविन्दकोलंगडे, हुबल्ली, मुम्बई, 1956